निरुक्तम्

निरुक्तम्

* 12 अध्याय + 2 परिशिष्ट अध्याय

* तीन काण्ड = नैघण्टुक काण्ड, नैगम काण्ड, दैवत काण्ड

(नैगम काण्ड → एकपदिक काण्ड *)

* निरुक्त = निघण्टु (वैदिक शब्द कोष) ग्रन्थ का ही व्याख्या है।

निघण्टु ⇓ 5 अध्याय; → प्रजापति कश्यप द्वारा।

* अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तत् निरुक्तम्

⇒ निरुक्त के टीकाकार

* दुर्गाचार्य ⇒ ऋज्वर्थवृत्ति
* वररुचि: ⇒ निरुक्तनिचय

* निरुक्त के टीकाकार आचार्य दुर्गाचार्य ने 14 निरुक्तों का संकेत प्राप्त होता है।
* 'छन्दहीनो न शब्दोऽस्ति, न छन्दः शब्दवर्जितम्' – भरतमुनि नाट्यशास्त्र
* 'तदिदं निरुक्तं व्याकरणस्य कार्त्स्न्यम्' – 'कात्यायनस्य'

प्रथम अध्याय

⇒ निघण्टु की परिभाषा

* तम् इमं समाम्नाय 'निघण्टव' इति आचक्षते।
* [वैदिक शब्दों के उस संग्रह को निघण्टु कहते हैं]

* 'निगमा इमे भवन्ति - छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाताः'

→ क्योंकि यह अर्थबोधक होते है।

* 'निगन्तव एव सन्तो निगमनात् निघण्टव उच्यन्ते' – औपमन्यव

⇒ निघण्टु में शब्दों के चार विभाग

* चत्वारि पदजातानि - नामाख्यातोपसर्गनिपाताः

• **नाम**

↳ सत्त्वप्रधानानि नामानि [सत्त्व = द्रव्य]

• **आख्यात**

↳ भावप्रधानम् आख्यातम् [भाव = क्रिया]

* तद् यत्र उभे, भावप्रधाने भवतः
* षड् भावविकाराः भवन्तीति - **वार्ष्यायणिः**

⇓

जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यति

• **उपसर्ग**

↳ * न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति ।

* उच्चावचाः पदार्था भवन्तीति गार्ग्यः ।
= उपसर्गों के अपने अर्थ होते है ।

* 22 उपसर्ग - प्र, परा, अप, सम, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, प्रति, परि, अभि, उप, उत् ।

• **निपात**

↳ * उच्चावचेषु - अर्थेषु निपतन्ति इति निपाताः

निपात

- उपमार्थक ⇓ इव, न, चित्, नु
- कर्मोपसंग्रह / अर्थोपसंग्रह ⇓ च, किल, मा, खलु, नूनम् आदि
- पादपूरणार्थक ⇓ कम्, ईम्, इत्, उ — कर्मोमिद्

* **उपमार्थक**

① इवः = **उपमा**
↳ इव इति भाषायाम् (लोक) अन्वाध्यायि (वेदे) (वेद) च ।

उदा. लौक = अग्निरिव , वेद = इन्द्र इव

② नः = **उपमा, प्रतिषेध**
↳ न इति प्रतिषेधार्थीयो भाषायाम् । उभयम् अन्वध्यायम् ।
लोक में प्रतिषेध | वेद में निषेध और उपमा दोनों

उदा. निषेधार्थक = **न इन्द्रं देवममंसत** *
उपमार्थक = दुर्मदासो न सुरायाम्

③ चित् : = **उपमा, पूजा, निन्दा**
↳ 'चित् इति एष: अनेककर्मा'

- पूजार्थ = **आचार्यश्चित् इदं ब्रूयात्** *
- उपमार्थ = दधिचित्
- अवकुत्सित = कुल्माषांश्चिदाहार

(5) नु : उपमा, हेतु, अनुप्रश्न

↳ नु इत्येषोऽनेककर्मा

• हेत्वर्थ = इदं नु करिष्यति

• अनुप्रश्नार्थ = कथं नु करिष्यति

• उपमार्थ = वृक्षस्य नु ते पुरुहूत: वया: *

⇒ कर्मोपसंग्रह

* 'च' इति समुच्चयार्थे - 'अहं च त्वं च वृत्रहन्' इति

* 'वा' इति विचारणार्थे - 'हन्ताहं पृथिवीमिमां निदधानीह वेह वा'

* ↳ अथापि समुच्चयार्थे भवति - 'वायु: वा त्वा मनु: वा त्वा'

* मा - प्रतिषेधे - मा कार्षी:, मा हार्षी इति

* खलु - प्रतिषेधे = खलु कृत्वा, खलु कृतम् इति ।

* 'नूनम' इति - विचिकित्सार्थीयो भाषायाम्

*'खलु' निपात का अर्थ इस प्रकार होता है -

• खलु कृत्वा
• खलु कृतम्
} प्रतिषेध अर्थे

• खलु तद् बभूव → पदपूरण के लिए

⇒ पादपूरणार्थक निपात

* कमोमिद्धु = कम्, ईम्, इत्, उ

शब्द-नित्यत्व विमर्श

* औदुम्बरायण का मत:

↳ • इन्द्रियनित्यत्वं वचनमौदुम्बरायण:

① तत्र चतुष्ट्वं नोपपद्यते
② अयुगपत् उत्पन्नानां वा शब्दानां इतर-इतरोपदेश:
③ शास्त्रकृतो योगश्च

* यास्क का मत:

↳ 'व्याप्तिमत्त्वात् तु शब्दस्य:'

व्याप्तिमान् होने से शब्द का नित्यत्व सिद्ध होता है।

⇒ **निरुक्त अध्ययन के प्रयोजन** : **पंचम पाद**

↳ प्रथम प्रयोजन = समाम्नाय: समाम्नात:। स व्याख्यातव्य:।

द्वितीय प्रयोजन = मन्त्रेषु अर्थप्रत्ययो न विद्यते [इसके बिना मन्त्रों के अर्थ का ज्ञान नहीं होता]

अत: निरुक्तम् = * तदिदं विद्यास्थानम्

कात्यायन ← * व्याकरणस्य कार्त्स्न्य

* स्वार्थसाधकं च

> वर्णागमो वर्ण-विपर्ययश्च द्वौ चापरौ वर्ण-विकारनाशौ।
> धातोस्तदर्थातिशयेन योगस्तदुच्यते पंचविधं निरुक्तम्॥
>
> → **वर्णागम** ↳ आस्थत, द्वार:, भरुजा
> → **वर्णविपर्यय**
> → **वर्णविकार** ⇒ उपधाविकार ↳ राजा, दण्डी,
> → **वर्णनाश** ↳ स्त: = सन्ति, गत्वा - गतम्
> → **धातोस्तदर्थातिशय** = इष्टम्, इष्ट्वा

कौत्स

↳ अनर्थका: हि मन्त्रा: इति कौत्स:

मन्त्र अनर्थक होते हैं।

यास्क

↳ 'अर्थवन्त: शब्दसामान्यात्' [7 मतों का खण्डन]

लौकिक और वैदिक वाक्यों में शब्द की समानता होने के कारण वे मन्त्र अर्थयुक्त हैं।

⇒ **निर्वचन के सिद्धान्त** द्वितीय अध्याय

*'निष्कृष्य- विगृह्य- वचनं निर्वचनम्'

* वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदार्थातिशयेन योगस्तदुच्यते पंचविधं निरुक्तम् ॥

① आचार्य :
↳ आचार्य: आचारं ग्राहयति । आचिनोत्यर्थान् । आचिनोति बुद्धिम् ।

② वीर :
↳ वीरयति अमित्रम् । वेत्तेर्वा स्याद् गतिकर्मण: , वीरयतेर्वा ।

③ ह्रद :
↳ ह्रदो ह्रादते शब्दकर्मण: । ह्लदतेर्वा स्यात् , शीतिभावकर्मण: ।

④ गो -
↳ गौरिति पृथिव्या नामधेयम् । यद् दूरङ्गता भवति । यत् च अस्यां भूतानि गच्छति । गातेर्वा ओकारो नामकरण: ।

⑤ समुद्र:
↳ समुद्रवन्ति अस्मादाप: ।

⑥ आदित्य:
↳ आदत्ते रसान् , आदत्ते भासं ज्योतिषाम् आदीप्तो भासेति वा, अदिते: पुत्र: इति वा ।

⑦ उषस् -
↳ उच्छतीति सत्या रात्रेरपर: काल:

⑧ वाक् -
↳ वक्तीति वाक् । वचे: उच्यतेऽनया इति वाक् ।

⑨ अश्व:
↳ अश्नुतेऽध्वानम् । महाशनो भवतीति वा ।

निरुक्तम्

→ 12 अध्याय + 2 परिशिष्ट अध्याय

→ तीन काण्ड = नैघण्टुक काण्ड, नैगमकाण्ड, दैवतकाण्ड

↳ एकपदिक काण्ड

* निरुक्त = निघण्टु [वैदिक शब्द कोष] का ही व्याख्या ग्रन्थ है

⇓

5 अध्याय

* 'अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तत् निरुक्तम्'

⇒ निरुक्त के टीकाकार

↳ * दुर्गाचार्य = ऋज्वर्थवृत्ति, निरुक्तश्लोकवार्तिक

* वररुचि: = निरुक्तनिचय

प्रथम अध्याय

ॐ समाम्नाय: समाम्नात: । स व्याख्यातव्य: । तम् इमं समाम्नायं 'निघण्टव' इति आचक्षते । निघण्टव: कस्मात्? निगमा: इमे भवन्ति- छन्दोभ्य: समाहृत्य समाहृत्य समाम्नाता: । निगन्तव एव सन्तो 'निगमनात् निघण्टव उच्यन्ते इति औपमन्यव:' । अपि वा आहननाद् एव स्यु: । समाहता भवन्ति । यद्वा, समाहृता भवन्ति ।

तद् यानि एतानि चत्वारि पदजातानि नामाख्याते च उपसर्गनिपाताश्च, तान् इमानि भवन्ति- तत्र एतत् नामाख्यातयो: लक्षणं प्रदिशन्ति - 'भावप्रधानम् आख्यातम्' । सत्त्वप्रधानानि नामानि । तद्यत्र उभे, भावप्रधाने भवत: । पूर्वापरीभूतं भावम् आख्यातेन आचष्टे, व्रजति पचति इति उपक्रमप्रभृति अपवर्ग-पर्यन्तम् ।

मूर्त्तं सत्त्वभूतं सत्त्वनामभिः, व्रज्या पक्तिरिति। अदः इति सत्त्वा उपदेशः। गौरश्वः पुरुषो हस्तीति, भवतीति भावस्य, आस्ते शेते व्रजति तिष्ठति इति। इन्द्रियनित्यं वचनम् औदुम्बरायणः।

तत्र चतुष्ट्वं नोपपद्यते। अयुगपद् उत्पन्नानां वा शब्दानाम् इतरेतरोपदेशः। शास्त्रकृतो योगश्च। व्याप्तिमत्त्वात् तु शब्दस्य। अणीयस्त्वात् च शब्देन संज्ञाकरणं व्यवहारार्थं लोके। तेषां मनुष्यवद् देवताभिधानम्। पुरुषविद्यानित्यत्वात् कर्मसम्पत्तिः मन्त्रो वेदे।

षड् भावविकारा भवन्तीति वार्ष्यायणिः। जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यति इति। जायते इति पूर्वभावस्य आदिम् आचष्टे। नापरभावमाचष्टे - न प्रतिषेधति। अस्ति- इति उत्पन्नस्य सत्त्वस्य अवधारणम्। विपरिणमते - इत्यप्रच्यवमानस्य तत्त्वाद् विकारम्। वर्धते - इति स्वाङ्ग अभ्युच्चयम्। सां यौगिकानां वाऽर्था नाम। वर्धते विजयेनेति इति वा; शरीरेणेति वा। अपक्षीयते इति एतेनैव व्याख्यातः प्रतिलोमम्। विनश्यति - इति अपरभावस्यादिमाचष्टे। न पूर्वभावमाचष्टे, न प्रतिषेधति॥

अतोऽन्ये भाव विकारा एतेषामेव विकारा भवन्तीति ह स्माह। ते यथावचनम् अभ्युहितव्याः। न निर्बद्धा उपसर्गाः अर्थान् निराहुरिति शाकटायनः। नामाख्यातयोस्तु कर्मोपसंयोग- द्योतका भवन्ति। उच्चावचाः पदार्था भवन्तीति गार्ग्यः। तद्य एषु पदार्थः प्राहुरिमे तत् नामाख्यातयोः अर्थविकरणम्।

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
प्रहाराहारसंहारविहारपरिहारवत्॥

- आ इति अर्वागर्थे, प्र-परा इति एतस्य प्रातिलोम्यम्।
- अभि इति अभिमुखम्, प्रति इति एतस्य प्रातिलोम्यम्।
- अति-सु इति अभिपूजितार्थे, निर्-दुर् इति एतयोः प्रातिलोम्यम्।
- नि-अव इति विनिग्रह-अर्थीयौ, उत् इति एतयोः प्रातिलोम्यम्।
- सम् इति एकीभावम्, वि-अप् इति एतस्य प्रातिलोम्यम्।
- अनु इति सादृश्यापरभावम्। • अपि इति संसर्गम्।
- उप इति उपजनम्। • परि इति सर्वतोभावम्।
- अधि इति उपरिभावम् ऐश्वर्यं वा। एवम् उच्चावचान् अर्थान् प्राहुः। ते उपेक्षितव्याः।

⇒ **द्वितीय पाद**

↳ अथ निपाताः। उच्चावचेष्वर्थेषु निपतन्ति इति निपाताः। अपि उपमार्थे, अपि कर्मोपसंग्रहार्थे, अपि पदपूरणार्थकाः। तेषामेते चत्वार उपमार्थे भवन्ति।

निपात

- उपमार्थक
  - ॥
  - इव, न, चित्, नु
- कर्मोपसंग्रह (अर्थोपसंग्रह)
  - ॥
  - च, किल, मा, खलु, नूनम् आदि
- पदपूरणार्थक
  - ⇓
  - कम्, ईम्, इत्, उ
  - (कमीमिद्वु)

* 'इव' इति भाषायां च अन्वध्यायं च। 'अग्निरिव', इन्द्र इव इति।

* 'न' इति प्रतिषेधार्थीयो भाषायाम्, उभयम् अन्वध्यायम्। 'नेन्द्रं देवममंसत' इति प्रतिषेधार्थीयो, पुरस्तादुपचारस्तस्य यत्प्रतिषेधति।

'दुर्मदासो न सुरायाम्' इति उपमार्थीयः। उपरिष्टाद् उपचारः तस्य येन उपमीयते।

* चिद् इति एषोऽनेककर्मा । 'आचार्यश्चिदिदं ब्रूयात्' इति पूजायाम् । आचार्यः आचारं ग्राहयति, आचिनोति अर्थान्, आचिनोति बुद्धिमिति वा । 'दधिचित्' इति उपमार्थे । 'कुल्माषांश्चिदाहर' इति अवकुत्सिते । कुल्माषाः कुलेषु सीदन्ति ।

* 'नु' इत्येषोऽनेककर्मा । 'इदं नु करिष्यति' इति हेत्वपदेशे । 'कथं नु करिष्यति' इति अनुपृष्टेन, 'नु एतद् अकार्षीत्' इति च । अथापि उपमार्थे भवति- 'वृक्षस्य नु ते पुरुहूत! वयाः' ।

- वृक्षस्य इव ते पुरुहूतः शाखाः
- वयाः शाखाः वेतेः वातायनाः भवन्ति ।
- शाखाः खशयाः शक्नोतेर्वा

* अथ यस्य आगमात् अर्थपृथक्त्वम् अह विज्ञायते, न तु औद्देशिकमिव, विग्रहेण पृथक्त्वाद्, स कर्मोपसंग्रहः ।

- 'च' इति समुच्चयार्थः, उभाभ्यां सम्प्रयुज्यते । 'अहं च त्वं च वृत्रहन्' इति । एतस्मिन् एवार्थे 'देवेभ्यश्च पितृभ्य आ' इति आकारः ।
- 'वा' इति विचारणार्थे । 'हन्ताहं पृथिवीमिमां निदधानीह वेह वा' इति । अथापि समुच्चयार्थे भवति- 'वायुर्वा त्वा मनुर्वा त्वा' इति ।
- 'अह' इति च 'ह' इति च विनिग्रहार्थीयौ, पूर्वेण सम्प्रयुज्येते । 'अयं अह इदं करोतु, अयमिदम्' । 'इदं ह करिष्यति, इदं न करिष्यति' इति । अथापि उकारः एतस्मिन् एवार्थे उत्तरेण - 'मृषा इमे वदन्ति, सत्यम् उ ते वदन्ति' इति । अथापि पदपूरणः - इदमु, तदु इति ।
- 'हि' इत्येषोऽनेककर्मा । 'इदं हि करिष्यति' इति हेत्वपदेशे । 'कथं हि करिष्यति' इति अनुपृष्टे । 'कथं हि

'किल' इति विद्याप्रकर्षे । 'एवं किल' इति । अथापि 'न' 'ननु' इति एताभ्यां सम्प्रयुज्यते अनुपृष्टे । 'न किल एवम्' 'ननु किल एवम्' ।

• 'मा' इति प्रतिषेधे । 'मा कार्षीः', मा हार्षीः इति च ।

• 'खलु' इति प्रतिषेधे च । 'खलु कृत्वा', 'खलु कृतम्' इति । अथापि पदपूरणः - 'एवं खलु तद्बभूव' इति ।

* 'शश्वत्' इति विचिकित्सार्थीयो भाषायाम् । 'शश्वत् एवम्' इति अनुपृष्टे । 'एवं शश्वत्' इति अस्वयं पृष्टे ।

• 'नूनम्' इति विचिकित्सार्थीयो भाषायाम् । उभयम् अन्वध्यायम् विचिकित्सार्थीयश्च पदपूरणश्च ॥

⇛ **तृतीय पाद**

न नूनमस्ति नो श्वः, कस्तद् वेद यद् अद्भुतम् ।
अन्यस्य चित्तम् अभिसंचरेण्यम्, उताधीतं विनश्यति ॥

ऋ. 1.170.1

न नूनमस्ति अद्यतनम् । नो एव श्वः तनम् । अद्य = अस्मिन् द्यवि । 'द्युः' इति अह्नो नामधेयम् । द्योतते इति सतः । श्वः उपाशंसनीयः कालः । ह्यः हीनः कालः । 'कस्तद् वेद यद् अद्भुतम्' = कः तद् वेद, यद् अभूतम् ? इदमपि इतरत् 'अद्भूतम्' अभूतमिव । अन्यस्य चित्तम् अभिसंचरेण्यम् = 'अभिसंचारि' । अन्यः = नानेयः । चित्तं चेततेः । उताधीतं विनश्यति इति = अपि आध्यातं विनश्यति । आध्यातम् = अभिप्रेतम् ॥ अथापि पादपूरणः ॥

नूनं सा ते प्रति वरं जरित्रे, दुहीयद् इन्द्र दक्षिणा मघोनी ।
शिक्षा स्तोतृभ्यो माति धग्भगो नो, बृहद् वदेम विदथे सुवीराः ॥

सा ते प्रतिदुग्धां वरं जरित्रे । वर वरयितव्यो भवति । जरिता = गरिता । दक्षिणा । मघोनी = मघवती । मघम् इति धननामधेयम् । मंहतेः दानकर्मणः । दक्षिणा दक्षतेः समर्धयति कर्मणः । व्यृद्धं समर्धयति

अपि वा प्रदक्षिणागमनात् दिशमभिप्रेत्य । दिक् हस्तप्रकृतिः । दक्षिणो हस्तो दक्षतेः उत्साहकर्मणः । दाशतेर्वा स्यात् दानकर्मणः । हस्तो हन्तेः । प्राशुः हनने ।

देहि स्तोतृभ्यः कामान् । मा अस्मान् अतिदंहीः । मा अस्मान् अतिहाय दाः । भगो नोऽस्तु । बृहद् वदेम स्वे वेदने । भगो भजतेः। बृहत् इति महतो नामधेयम् । परिवृढं भवति । वीरवन्तः, कल्याणवीराः वा । वीरो वीरयति अमित्रान् । वेतेर्वा स्याद् गतिकर्मणः । वीरयतेर्वा ॥

'सीम्' इति परिग्रहार्थीयो वा, पादपूरणो वा । 'प्र सीमादित्यो असृजत्' । प्रासृजत इति वा । प्रासृजत् सर्वतः इति वा । सीम्नः = सीमतः - सीमातः - मर्यादातः । सीमा = मर्यादा ।

ऋचां त्वः पोषमास्ते पुपुष्वान्, गायत्रं त्वो गायति शक्वरीषु ।
ब्रह्मा त्वो वदति जातविद्यां, यज्ञस्य मात्रां वि मिमीत उ त्वः ॥

होता = ऋचां पोषमास्ते

ऋ. 10.71.11
ज्ञान सूक्त

अध्वर्यु = यज्ञस्य मात्रां विमिमीते

उद्गाता = गायत्रं गायति

ब्रह्मा = जातविद्यां वदति

→ इति ऋत्विक् कर्मणां विनियोगम् आचष्टे । ऋचाम् एकः पोषम् आस्ते पुपुष्वान् - होता । ऋक् = अर्चनी । गायत्रं एको गायति शक्वरीषु - उद्गाता । गायत्रं गायतेः स्तुतिकर्मणः । शक्वर्यः ऋचः शक्नोतेः । 'तद् याभिः वृत्रमशकद् हन्तुं तत् शक्वरीणां शक्वरीत्वम्' - इति विज्ञायते ।

ब्रह्मा एको जाते जाते विद्यां वदति । ब्रह्मा सर्वविद्यः । सर्वं वेदितुम् अर्हति । ब्रह्मा परिवृढः श्रुततः । ब्रह्म परिवृढं सर्वतः । यज्ञस्य मात्रां विमिमीते एकः अध्वर्युः । अध्वर्युः = अध्वरयुः । अध्वरं युनक्ति, अध्वरस्य नेता, अध्वरं कामयते इति वा ।

अपि वा अधीयाने 'युः' उपबन्धः । अध्वरः इति यज्ञनाम । ध्वरतिः हिंसाकर्मा, तत्प्रतिषेधः ।

अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः ।
आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे ॥ ऋ. 10.71.7

अक्षिमन्तः कर्णवन्तः सखायः । 'अक्षि' चष्टेः । अनक्तेः इति आग्रायणः 'तस्मादेते व्यक्ततरे इव भवतः' इति ह विज्ञायते । कर्णः कृन्ततेः । निकृत्तद्वारो भवति । ऋच्छतेः इति आग्रायणः । ऋच्छन्ति इव, खे उदगन्तामिति ह विज्ञायते ।

अथापि समुच्चयार्थे भवति । 'पर्याया इव त्वदाश्विनम्' । आश्विनं च पर्यायाश्च इति । अथ ये प्रवृत्ते अर्थे अमिताक्षरेषु ग्रन्थेषु वाक्यपूरणाः आगच्छन्ति, पदपूरणास्ते मिताक्षरेषु । अनर्थकाः । कम् ईम् इत उ इति ।

हविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमान् ।
शचीर्मदन्त उत दक्षिणाभिः न इज् जि ह्मायन्त्यो नरकं पताम ॥
ऋ. खिल २५.१

नरकं नि अरकम् । नीचै गमनम् । न अस्मिन् रमणं स्थानम् अल्पम् अपि अस्ति इति वा । अथापि 'न च' इत्येष 'इत्' इत्येतेन संप्रयुज्यते अनुपृष्टे । 'न चेत्सुरां पिबन्ति' इति । सुरा सुनोतेः । एवम् उच्चावचेषु अर्थेषु निपतन्ति । ते उपेक्षितव्याः ।

⇒ **चतुर्थ पाद**

इति इमानि चत्वारि पदजातानि अनुक्रान्तानि नामाख्याते चोपसर्गनिपाताश्च । 'तत्र नामानि आख्यातजानि इति शाकटायनः नैरुक्तसमयश्च' । 'न सर्वाणि इति गार्ग्यः वैयाकरणानां चैके' ।

तद् यत्र स्वर-संस्कारौ समर्थौ प्रादेशिकेन गुणेन अन्वितौ स्यातां .... संविज्ञातानि तानि । यथा - गौः अश्वः पुरुषः हस्तीति । अथ चेत् सर्वाणि आख्यातजानि नामानि स्युः, यः कश्च तत्कर्म कुर्यात् सर्वं तत् सत्त्वं तथा आचक्षीरन् । यः कश्च

अध्वानम्, अश्नुवीत, अश्वः स वचनीयः स्यात् । यत् किञ्चित् तृन्द्यात् तृणं तत् । अथापि चेत् सर्वाणि आख्यातजानि नामानि स्युः, यावद्भिः भवैः सम्प्रयुज्येत तावद्भ्यः नामधेयप्रतिलम्भः स्यात् । तत्र एवं स्थूणा दरशया च आसञ्जनी च स्यात् ।

⇒ **पञ्चम पाद**

↳ अथापि इदमन्तरेण मन्त्रेषु अर्थप्रत्ययो न विद्यते । अर्थम् अप्रतियतो नात्यन्तं स्वर-संस्कारोद्देशः । तदिदं विद्यास्थानम् । व्याकरणस्य कार्त्स्न्यम् । स्वार्थसाधकं च । यदि मन्त्रार्थप्रत्ययाय, अनर्थकं भवति इति कौत्सः । अनर्थका हि मन्त्राः । तदेतेन उपेक्षितव्यम् ।

* **निरुक्त अध्ययन प्रयोजन**

↳ · अनर्थका हि मन्त्राः इति कौत्स - (7)

① नियतवाचोयुक्तयः नियतानुपूर्व्याः भवन्ति ।

② अथापि ब्राह्मणेन रूपसम्पन्नाः विधीयन्ते । 'उरु प्रथस्व' इति प्रथयति । 'प्रोहाणि' इति प्रोहति ।

③ अथापि अनुपपन्नार्थाः भवन्ति । 'ओषधे त्रायस्व एनम्' 'स्वधिते मा एनं हिंसीः' इत्याह हिंसन् ।

④ अथापि विप्रतिषिद्धार्थाः भवन्ति । 'एक एव रुद्रोऽवतस्थे न द्वितीयः' । 'असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम्' । 'अशत्रुरिन्द्र जज्ञिषे' । 'शतं सेना अजयत् साकमिन्द्रः' इति ।

⑤ 'अथापि जानन्तं सम्प्रेष्यति' । 'अग्नये समिध्यमानायानुब्रूहि' इति ।

⑥ अथापि आह: अदितिः सर्वमिति । 'अदितिर्द्यौरदितिरन्तरिक्षं' इति । तदुपरिष्टात् व्याख्यास्यामः ।

⑦ अथापि अविस्पष्टार्थाः भवन्ति । अम्यक्, यादृश्मिन्, जारयायि, काणुका इति ।

यास्क मत

> * अर्थवन्तः शब्दसामान्यात् । 'एतद्वै यज्ञस्य समृद्धं, यद्रूपसमृद्धं, यत्कर्म क्रियमाणम् ऋग्यजुः वा अभिवदति इति च ब्राह्मणम् । 'क्रीळन्तौ पुत्रैर्नप्तृभिः' ।

① यथो एतत् नियतवाचोयुक्तयो, नियतानुपूर्व्याः भवन्ति इति । लौकिकेषु अपि एतद् । यथा- इन्द्राग्नी, पितापुत्रौ इति ।

② यथो एतत् 'ब्राह्मणेन रूपसम्पन्ना: विधीयन्ते' इति । उदितानुवादः स भवति ।

③ यथो एतद् 'अनुपपन्नार्थाः भवन्ति' इति । आम्नाय-वचनाद् अहिंसा प्रतीयेत ।

④ यथो एतद् विप्रतिषिद्धार्थाः भवन्ति इति । लौकिकेषु अपि एतत् । यथा- असपत्नोऽयं ब्राह्मणः । अनमित्रो राजा इति ।

⑤ यथो एतद् 'जानन्तं सम्प्रेषति' इति । जानन्तम् अभिवादयते । जानते मधुपर्कं प्राह ।

⑥ यथो एतद् 'अदितिः सर्वमिति', लौकिकेषु अपि एतत् । यथा- सर्वरसाः अनुप्राप्ताः पानीयम् इति ।

⑦ यथो एतद् 'अविस्पष्टार्थाः भवन्ति' इति । नैष स्थाणोः अपराधः यदेनम् अन्धो न पश्यति । पुरुषापराधः स भवति । यथा- जानपदीषु विद्यातः पुरुषविशेषो भवति । पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति ।

⇒ षष्ठ-पाद

↳ अथापि इदम् अन्तरेण पदविभागो न विद्यते । 'अवसाय पद्वते रुद्र मृळ' इति । पद्वत् अवसम् । गावः पथ्यदनम् । अवतेः गत्यर्थस्य । असौ नामकरणः । तस्मात् न अवगृह्णन्ति । 'अवसाय-अश्वान्' इति । स्यतिः उपसृष्टो विमोचने, तस्मात् अवगृह्णन्ति ।

'दूतो निर्ऋत्या इदमा जगाम' इति । पंचम्यर्थप्रेक्षा वा षष्ठ्यर्थप्रेक्षा वा । आःकारान्तम् । 'परो निर्ऋत्या आ चक्ष्व' इति । चतुर्थ्यर्थप्रेक्षा । एेकारान्तम् । परः सन्निकर्षः संहिता । पदप्रकृतिः संहिता । पदप्रकृतीनि सर्वचरणानां पार्षदानि ।

अथापि याज्ञे दैवतेन बहवः प्रदेशाः भवन्ति । तद् एतेन उपेक्षितव्यम् । ते चेद् ब्रूयुः - 'लिङ्गज्ञाः अत्र स्मः' इति । 'इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति' इति । वायुलिङ्गं च इन्द्रलिङ्गं च आग्नेये मन्त्रे । त्विषितः ज्वलितः । त्विषिरिति अपि अस्य । दीप्ति नाम भवति । अथापि ज्ञान प्रशंसा भवति अज्ञाननिन्दा च ।

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥
यद् गृहीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्केन्धो न तज्ज्वलति कर्हिचित् ॥

स्थाणुः तिष्ठतेः । अर्थः अर्तेः । अरणस्थः वा ।

उत त्वः पश्यन्न ददर्श वाचम् उत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासा ॥

अपि एकः पश्यन् न पश्यति वाचम् । अपि च शृण्वन् न शृणोति एनाम् । इति अविद्वांसम् आह अर्धम् । अपि एकस्मै तन्वं विसस्रे

ते स्वम् आत्मानं विवृणुते ज्ञानम् । प्रकाशनम् अर्थस्य आह अनया वाचा । उपमा उत्तमाया वाचा । जाया इव पत्ये कामयमाना सुवासा ऋतुकालेषु । यथा स एनाम् पश्यति स शृणोति । इति अर्थज्ञप्रशंसा । तस्य उत्तरा भूयसे निर्वचनाय ।

उत त्वं सख्ये स्थिरपीतमाहुः नैनं हिन्वन्त्यपि वाजिनेषु ।
अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम् ॥

अपि एकं वाक्सख्ये स्थिरपीतम् आहुः रममाणं विपीतार्थम् । देवसख्ये रमणीये स्थाने इति वा । विज्ञानार्थं यं न आप्नुवन्ति वाक् ज्ञेयेषु फलवत्सु अपि । अधेन्वा हि एष चरति मायया वाक्प्रतिरूपया । न अस्मै कामान् दुग्धे वाक् दोह्यान् देव-मनुष्यस्थानेषु । यो वाचं श्रुतवान् भवति अफलान् अपुष्पाम् इति । अफला अस्मै अपुष्पा वाक् भवति इति वा । किञ्चिद् पुष्पफला इति वा । अर्थं वाचः पुष्पफलमाह । याज्ञदैवते पुष्पफले, देवताध्यात्मे वा ।

* साक्षात् कृत धर्माणः ऋषयो बभूवुः । ते अवरेभ्यः असाक्षात्कृतधर्मेभ्यः उपदेशेन मन्त्रान् सम्प्रादुः । उपदेशाय ग्लायन्तः वरे बिल्मग्रहणाय इमं ग्रन्थं समाम्नासिषुः । वेदं च वेदाङ्गानि च । बिल्मं = भिल्मम् । भासनमिति वा ।

* 'एतावन्तः समानकर्माणो धातवः' धातुः दधातेः । 'एतावन्ति अस्य सत्वस्य नामधेयानि' । एतावताम् अर्थानाम् इदम् अभिधानम् । नैघण्टुकमिदं देवतानाम् । प्राधान्येन इदमिति । तत् अन्यत् दैवते मन्त्रे निपतति नैघुण्टकं तत् । 'अश्वं न त्वा वारवन्तम्' । अश्वमिव त्वा बालवन्तम् । बालाः दंशवारणार्थाः भवन्तिः । दंशो दशतेः ।

* 'मृगो न भीमः कुचरो गिरिष्ठाः' । मृगः इव भीमः कुचरः गिरिष्ठाः । मृगः मार्ष्टेः गतिकर्मणः । भीमः बिभ्यति अस्मात् ।

क्षोभः अपि एतस्मादेव। कुचरः इति चरतिकर्म कुत्सितम्
अथ चेत् देवताभिधानम्, क्व अयं न चरति इति। गिरिष्ठाः
गिरिस्थायी। गिरिः पर्वतः। समुद्गीर्णो भवति। पर्ववान् पर्वतः।
पर्व पुनः पृणातेः प्रीणातेः वा। अर्धमासपर्व देवान् अस्मिन्
प्रीणन्ति इति। तत्प्रकृति इतरत् सन्धिसामान्यात्। मेघस्थायी।
मेघोऽपि गिरिः एतस्माद् एव।

तद् यानि नामानि प्राधान्यस्तुतीनां देवतानां तद् दैवतम्
इति आचक्षते। तद् उपरिष्टात् व्याख्यास्यामः। नैघण्टुकानि
नैगमानि इह इह।

द्वितीय अध्याय

प्रथम पाद

अथ निर्वचनम् । तद् येषु पदेषु स्वर-संस्कारौ समर्थौ प्रादेशिकेन गुणेन अन्वितौ स्याताम्, तथा तानि निर्ब्रूयात् । अथ अनन्विते अर्थे, अप्रादेशिके विकारे अर्थनित्यः परीक्षेत केनचित् वृत्तिसामान्येन । अविद्यमाने सामान्येऽपि अक्षरवर्णसामान्यात् निर्ब्रूयात् । न तु एव न निर्ब्रूयात् । न संस्कारम् आद्रियेत । विशयवत्यः हि वृत्तयः भवन्ति । यथार्थं विभक्तीः सन्नमयेत् ।

निर्वचन के सिद्धान्त

वर्णागमो वर्ण-विपर्ययश्च द्वौ चापरौ वर्ण-विकार-नाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पंचविधं निरुक्तम् ॥

- वर्णागम = अथापि वर्णोपजनः - आस्थत्, द्वारः, भरूजा इति ।
- वर्णविपर्यय =
  - अथापि आदिविपर्ययो भवति - ज्योतिः, घनः बिन्दुः, वाट्यः इति ।
  - अथापि आद्यन्त विपर्ययो भवति - स्तोकः, रज्जुः, सिकताः, तर्कुः इति ।
  - अथापि अन्तव्यापत्तिः (अन्तविपर्ययः) भवति- ओघः मेघः नाघः गाधः वधुः मधुः इति ।
- वर्णविकार = अथापि उपधाविकारो भवति - राजा दण्डी इति
- वर्णनाश = 'प्रत्तम्, अवत्तम्' इति धात्वादी एव शिष्येते
  अथापि अस्तेः निवृत्ति स्थानेषु आदिलोपः → आदि
  भवति = स्तः सन्तीति ।
  अथापि अन्तलोपो भवति - गत्वा, गतमिति

- धात्वर्थातिशय :
  - ↳ • यज् धातु सम्प्रसारण इष्टम्, इष्ट्वा ।
  - यज् धातु असम्प्रसारण - यष्टुम्, यष्टव्यम् ।
  - दम् उपशमने - दाम्यति, दमयति दान्तः, दमूना ।
  - लौकिक से वैदिक कृदन्त शब्द - दमूनाः, क्षेत्रसाधा
  - वैदिक से लौकिक कृदन्त शब्द - उष्णं घृतमिति
  - ऊतिः, मृदुः, पृथुः, पृषतः, कुणारुम् इति ।

⇒ शब्दों की व्युत्पत्ति

* राजपुरुष = राज्ञः पुरुषः इति राजपुरुषः । राजा राजतेः । पुरुषः पुरिषादः, पुरिशयः, पूरयतेः वा ।

* आचार्य = आचार्यः आचारं ग्राहयति, आचिनोति अर्थान्, आचिनोति बुद्धिमिति इति ।

* वीर = वीरो वीरयति अमित्रान् । वेतेर्वा स्याद् गतिकर्मणः । वीरयतेर्वा ।

* ह्रदः = ह्रदो ह्रादते शब्दकर्मणः । ह्रदतेर्वा स्यात्, शीतिभावकर्मणः ।

* गौ = गौः इति पृथिव्या नामधेयम् । यद् दूरं गता भवति । यच्च अस्यां भूतानि गच्छन्ति । गातेर्वा ओकारो नामकरणः । आदित्योऽपि गौः उच्यते ।

* पृथिवी = इति इमानि एकविंशतिः पृथिवीनामधेयानि अनुक्रान्तानि ।

हिरण्य = हिरण्यनामानि उत्तराणि पञ्चदश । हिरण्यं कस्मात् ? ह्रियते आयम्यमानमिति वा, ह्रियते जनात् जनमिति वा, हितरमणं भवतीति वा, हृदयरमणं भवति इति वा, प्रेप्साकर्मणः ।

* अन्तरिक्ष = अन्तरिक्षनामानि उत्तराणि षोडश: । अन्तरिक्षं कस्मात् ? अन्तरा क्षान्तं भवति, अन्तरा इमे इति वा, शरीरेषु अन्तः अक्षयमिति वा ।

* समुद्रः = समुद्द्रवन्ति अस्मात् आपः, समभिद्रवन्ति एनम् आपः । सम्मोदन्ते अस्मिन् भूतानि, समुदको भवति, समुनत्तीति वा ।

* आदित्य = साधारणानि उत्तराणि षट् दिवश्च आदित्यस्य च । आदित्यः कस्मात् ? आदत्ते रसान्, आदत्ते भासं ज्योतिषाम्, आदीप्तो भासेति वा । अदितेः पुत्र इति वा ।

* स्वर = स्वर् आदित्यो भवति । सु अरणः, सु ईरणः, स्वृतो रसान् स्वृतो भासं ज्योतिषाम्, स्वृतो भासेति वा ।

* रश्मि = रश्मिनामानि उत्तराणि पञ्चदश । रश्मिः यमनात् । तेषामादितः साधारणानि पंच अश्वरश्मिभिः ।

* दिक् = दिङ्नामानि उत्तराणि अष्टौ । दिशः कस्मात् ? दिशतेः आसदनात्, अपि वा अभ्यशनात् ।

* काष्ठः = काष्ठाः दिशो भवन्ति । क्रान्त्वा स्थिता भवन्ति । काष्ठाः उपदिशो भवन्ति - इतरेतरं क्रान्त्वा स्थिता भवन्ति । आदित्योऽपि काष्ठा उच्यते । आज्यन्तो अपि काष्ठा उच्यते । आपोऽपि काष्ठाः उच्यन्ते । क्रान्त्वा स्थिता भवन्ति इति स्थावराणाम् ।

* वृत्रः = वृत्रो वृणोतेः वा । वर्ततेः वा, वर्धतेर्वा । 'यद् अवृ
तत् वृत्रस्य वृत्रत्वम्' इति विज्ञायते । 'यद् अवर्तत तत्
वृत्रस्य वृत्रत्वम्' इति विज्ञायते ।

* रात्रिः = रात्रिनामानि उत्तराणि त्रयोविंशतिः । रात्रिः कस्मात्?
प्ररमयति भूतानि नक्तंचारीणि । उपरमयति इतराणि
ध्रुवीकरोति । रातेः वा स्याद् दानकर्मणः । प्रदीयन्ते
अस्याम् अवश्यायाः ।

* उषस् = उषोनामानि उत्तराणि षोडशः । उषाः कस्मात्?
उच्छति इति सत्याः । रात्रेः अपरः कालः । तस्याः
एषा भवति ।

* अहः = अहर्नामानि उत्तराणि द्वादशः । अहः कस्मात्?
उपाहरन्ति अस्मिन् कर्माणि । तस्यैष निपातो भवति-
वैश्वानरीयायाम् ऋचि ।

* मेघ = मेघनामानि उत्तराणि त्रिंशत् । मेघः कस्मात्?
मेहतीति सतः । आ 'उपर- उपल' इत्येताभ्यां
साधारणानि पर्वतनामभिः । उपरः उपलः मेघो
मेघो भवति । उपरमन्ते अस्मिन् अभ्राणि । उपरता
आप इति वा । तेषाम् एषा भवति ।

* वाक् = वाक् नामानि उत्तराणि सप्तपञ्चाशत् । वाक् कस्मात्?
वचेः । तत्र सरस्वती इत्येतस्य नदीवत् देवतावत्
निगमा भवन्ति ।

* उदक = उदक नामानि उत्तराणि एकशतम् । उदकं कस्मात्?
उनत्तीति सतः । ऋतवत्यः ऋतमिति उदकनाम ।

र्ण = नदीनामानि उत्तराणि सप्तत्रिंशत् । नद्यः कस्मात् ?
नदनाः भवन्ति शब्दवत्यः ।

* अश्वः = अश्वनामानि उत्तराणि षड्विंशति । तेषाम् अष्ट उत्तराणि बहुवत् । अश्वः कस्मात् ? अश्नुते अध्वानम् । महाशनो भवति इति वा ।

* ग्रीवा = ग्रीवा गिरतेः वा, गृणातेः वा, गृह्णातेः वा ।

दश उत्तराणि आदिष्टोपयोजनानि - इति आचक्षते 'साहचर्य-ज्ञानाय' । ज्वलतिकर्मणः उत्तरे धातवः एकादश: । तावन्ति एव उत्तराणि ज्वलतो नामधेयानि नामधेयानि ।

* मनुष्य = मनुष्यनामानि उत्तराणि पंचविंशतिः । मनुष्याः कस्मात् ? मत्वा कर्माणि सीव्यन्ति । मनस्यमानेन सृष्टाः । मनस्यतिः पुनर्मनस्वीभावे । मनोः अपत्यम्, मनुषो वा ।

* अग्निः = अग्निः अग्रणीर्भवति । अयं यज्ञेषु प्रणीयते । अङ्गं नयति सङ्गमानः ।

* जातवेदस = जातवेदाः कस्मात् ? जातानि वेद । जातानि वा एनं विदुः । जाते जाते विद्यते इति वा । जातवित्तो वा जातधनः । जातविद्यो व जातप्रज्ञानः ।

* वैश्वानर = वैश्वानरः कस्मात् ? विश्वान् नरान् नयति । विश्वे एनं नराः नयन्ति इति वा । अपि वा वैश्वानर एव स्यात् ।

* निघण्टु = निघण्टवः कस्मात् ? निगमा इमे भवन्ति - छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाताः । ते निगन्तव एव सन्तो निगमनात् निघण्टव उच्यन्ते इति औपमन्यवः । अपि वा आहननादेव स्युः । समाहता भवन्ति । यद्वा समाहृता भवन्ति ।

सप्तमोऽध्याय

⇒ प्रथम अध्याय

↳ अथातो दैवतम् । तद् यानि नामानि प्राधान्यस्तुतीनां देवतानां तत् दैवतमिति आचक्षते । सा एषा देवतोपपरीक्षा । यत् कामः ऋषिः यस्यां देवतायाम् आर्थपत्यम् इच्छन् स्तुतिं प्रयुङ्क्ते तत् दैवतः स मन्त्रो भवति ।

ताः त्रिविधाः ऋचः - परोक्षकृताः । प्रत्यक्षकृताः । आध्यात्मिक्याश्च ।

① परोक्षकृता - प्रथमपुरुष

↳ तत्र परोक्षकृताः सर्वाभिः नामविभक्तिभिः युज्यन्ते । प्रथमपुरुषैश्च आख्यातस्य । यथा-

प्रथमा विभक्ति → 'इन्द्रो दिवः इन्द्र ईशे पृथिव्याः'
द्वितीया विभक्ति → इन्द्रमिद् गाथिनो बृहद्
तृतीया विभक्ति → इन्द्रेणैत तृत्सवो वेविषाणाः
चतुर्थी विभक्ति → इन्द्राय साम गायत
पंचमी विभक्ति → नेन्द्राद् ऋते पवते धाम किंचन
षष्ठी विभक्ति → इन्द्रस्य नु वीर्याणि प्रवोचम्
सप्तमी विभक्ति → इन्द्रे कामा अयंसत इति ।

② प्रत्यक्षकृता - मध्यमपुरुष

↳ अथ प्रत्यक्षकृताः मध्यमपुरुषयोगाः, त्वमिति च एतेन सर्वनाम्ना 'त्वमिन्द्र बलादधि', 'वि न इन्द्र मृधो जहि' इति । अथापि प्रत्यक्षकृताः स्तोतारो भवन्ति, परोक्षकृतानि स्तोतव्यानि । 'मा चिदन्यद् वि शंसत', 'कण्वा अभि प्र गायत', 'उप प्रेत कुशिकाश्चेतयध्वम्' इति ।

आध्यात्मिक्य - उत्तमपुरुष

↳ अथ आध्यात्मिक्यः उत्तमपुरुषयोगाः, अहमिति च एतेन सर्वनाम्ना । यथा एतद् - 'इन्द्रो वैकुण्ठः' । लवसूक्तम् । वागाम्भृणीयम् इति ।

→ परोक्षकृताः प्रत्यक्षकृताश्च मन्त्राः भूयिष्ठाः, अल्पशः आध्यात्मिकाः अथापि स्तुतिरेव, नाशीर्वादः - 'इन्द्रस्य नु वीर्याणि प्र वोचम्' इति यथा एतस्मिन् सूक्ते । अथापि आशीरेव, न स्तुतिः - 'सुचक्षा अहम् अक्षीभ्यां भूयासम्, सुवर्चा मुखेन, सुश्रुत् कर्णाभ्याम् भूयासम्' इति । तदेतद् बहुलम् आध्वर्यवे याज्ञेषु च मन्त्रेषु ।

→ अथापि शपथाभिशापौ - 'अद्या मुरीय यदि यातुधानो अस्मि' 'अधा स वीरैर्दशभिर्वियूयाः' इति ।

अथापि कस्यचिद् भावस्य आचिख्यासा - 'न मृत्युरासीदमृतं न तर्हि, तम आसीत्तमसा गूढमग्ने' ।

अथापि परिदेवना कस्माच्चिद् भावात् - 'सुदेवो अद्य प्रपतेदनावृत् न वि जानामि यदि वेदमस्मि' इति ।

* अथापि निन्दाप्रशंसे - 'केवलाघो भवति केवलादी', 'भोजस्येदं पुष्करिणीव वेश्म' इति । एवम् अक्षसूक्ते द्युतनिन्दा च कृषिप्रशंसा च । एवम् उच्चावचैः अभिप्रायैः ऋषीणां मन्त्रदृष्टयः भवन्ति ।

निरुक्त में चार प्रकार के देवतावाद :

- पौरुषविध्यम्
- अपौरुषविध्यम्
- कर्मात्मोभयविध्यम्
- नित्यमोभयविध्यम्

⇒ **द्वितीय पाद**

↳ तिस्रः एव देवताः - इति नैरुक्ता । अग्निः पृथिवीस्था वायुर्वा इन्द्रो वा अन्तरिक्षस्थानः, सूर्यो द्युस्थानः । तासां महाभाग्यात् एकैकस्यापि बहूनि नामधेयानि भवन्ति । अपि वा, कर्मपृथक्त्वाद् । यथा- होता, अध्वर्युः, ब्रह्मा, उद्गाता इति, अपि एकस्य सतः । अपि वा पृथगेव स्युः, पृथक् हि स्तुतयः भवन्ति तथा अभिधानानि ।

यथो एतत् - 'कर्मपृथक्त्वाद्' इति, बह्वोऽपि विभज्य कर्माणि कुर्युः । तत्र संस्थानैकत्वं, सम्भोगैकत्वं च उपेक्षितव्यम् ।

- पृथ्वी स्थानीय देवता = अग्नि, सोम, बृहस्पति, प्रजापति, विश्वकर्मा, अदिति- दिति, देवियां, नदीयां ।
- अन्तरिक्ष स्थानीय देवता = इन्द्र, रुद्र, मरुत (→ इन्द्रस्य मित्रम्), पर्जन्य, वात, वायु, मातरिश्वा, आप, अपानपात, त्रित, अहिर्बुध्न्य ।
- द्यु स्थानीय देवता = आदित्य (ऋताधिपति), सविता, सूर्य, पूषा, पूषन, मित्र, वरुण, उषस्, अर्यमा, अश्विनौ, द्यौ, विष्णु (↳ त्रिविक्रमः, उरुक्रमः) विवस्वत ।

* 'देवो दानाद् वा, दीपनात् वा, द्योतनाद् वा, द्यु स्थानो भवतीति वा' ।

वरुण = न्यायस्य देवता

तृतीय पाद

↳ तिस्रः एव देवताः इत्युक्तं पुरस्तात् । तासां भक्तिसाहचर्यं व्याख्यास्यामः । अथ एतानि -

* अग्नि भक्तीनि = अयं लोकः, प्रातः सवनं, वसन्तः, गायत्री, त्रिवृत् स्तोमः रथन्तरं साम, ये च देवगणाः समाम्नाताः प्रथमे स्थाने, अग्नायी पृथिवी इळा इति स्त्रियः ॥

↳ अथास्य कर्म → वहनं च हविषाम्, आवाहनं च देवतानाम् यच्च किंचित् दार्ष्टिविषयकम्, अग्निकर्म एव तत् ।

↳ अस्य संस्तविका देवाः → इन्द्रः, सोमः, वरुणः, पर्जन्यः, ऋतवः ।

* इन्द्र भक्तीनि = अन्तरिक्षलोकः, माध्यन्दिनं सवनं, ग्रीष्मः, त्रिष्टुप्, पञ्चदश स्तोमः, बृहत् साम, ये च देवगणाः समाम्नाताः मध्यमे स्थाने याश्च स्त्रियः ।

↳ अथास्य कर्म → रसानुप्रदानं वृत्रवधः । या च का च बलकृतिः इन्द्रकर्म एव तत् ।

↳ अस्य संस्तविका देवाः →

* आदित्य भक्तीनि ⇒ द्युलोकः, तृतीयसवनम्, वर्षाः, जगती, सप्तदश स्तोमः, वैरूपं साम, ये च देवगणाः समाम्नाताः उत्तमे स्थाने, याश्च स्त्रियः।

↳ अथास्य कर्म = रसादानं रश्मिभिश्च रसधारणम्, यच्च किंचित् प्रवह्लितम्, आदित्य कर्म एव तत्।

⇒ चतुर्थ पाद

↳ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्

⇒ अग्निम् ईळे - अग्निं याचामि, ईळिः अध्येषणाकर्मा, पूजाकर्मा वा।

पुरोहितः = व्याख्यातः यज्ञः च।

देवम् = देवो दानाद् वा, दीपनाद् वा, द्योतनाद् वा, द्युस्थानो भवति इति वा। यो देवः सा देवता।

होतारम् = ह्वातारम्

रत्नधातमम् = रमणीयानां धनानां दातृतमम्। तस्य एषा अपरा भवति।

* अग्निः पूर्वेभिरृषिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति॥

= अग्निः यः पूर्वैः ऋषिभिः ईडितव्यः, वन्दितव्यः, अस्माभिः च नवतरैः, स देवान् इह आवहतु इति। स न मन्येत। अयमेव अग्निः इति; अपि एते उत्तरे ज्योतिषी 'अग्नी' उच्येते।